# सस्कृत

## प्रथम प्रश्न पत्रक : (नाटक, प्राचीनकाव्यं, संस्कृतसाहित्यस्य इतिहास : छन्दांसि व्याकरणम् च)

Time allowed : Three hours                                        Maximum marks : 100

1. अधोलिखितेषु द्वयोः श्लोकयोः संदर्भ सहितः अनुवादः करणीयः

(क) सरसिजमनुविद्धं शैलवेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्य लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

**अथवा**

तीव्राघात प्रतिहततरूस्कंधलग्नैकदंतः
पादाकृष्टव्रततिवलयासङ्गसंजातपाशः।
मूर्तो विघ्नस्तपस इव नो भिन्न सारङ्गयूथो
धर्मारण्यं प्रविशति गतः स्यन्दनालोकभीतः।।

(ख) एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावन्दतरम्।
तावत् प्रिये! मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपैष्यसीति।।

**अथवा**

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी,
पर्णाभ्यन्तरलीनतां विजहति स्कंधोदयात् पादयाः।
संतानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते।

2. अधोलिखितानां संदर्भसहिता व्याख्या करणीया-

(क) स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेरयन्त्या तया,
यातं यच्च नितम्बयोर्गुरूतया मन्दं विलासादिव।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी,
सर्व तत् किल मत्परायणमहो कामी स्वतां पश्यति।।

**अथवा**

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
ईयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजित हिमगर्भैरग्निमिन्दुर्मयूखै-

http://questionpaperesult.com/

Scanned by CamScanner

स्त्वमपि कुसुमबाणान् वज्रसारी करोषि।।

(ख) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,
नादत्ते प्रियमंडनाऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुंतला पतिगृहं सर्वैरनुज्ञायताम्।।

**अथवा**

शुश्रूषस्व गुरून् कुरू प्रियसखीवृत्तिं सपत्नीजेन,
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।
भूमिष्ठं भव दक्षिणा परिजने भाग्येस्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।

3. अभिज्ञानशाकन्तुलमंधिकृत्य निम्नलिखितेषु केषाञ्चित् पञ्चप्रश्नानां उत्तरं देयम् (संस्कृतभाषायाम्)

(i) सकृद्युक्ततुरङ्ग कःअस्ति
(ii) कुसुममिव लाभनीयं यौवनं कुत्र अस्ति?
(iii) तृतीयेऽङ्के शकुंतला सखिभिः सह कस्याः नद्याः तीरेषु गच्छति?
(iv) षष्ठांशवृत्तिः कः अस्ति?
(v) दिवौकसः कस्य चरितं लिखन्ति?
(vi) दारेषु सर्वतोमुखी प्रभुता कस्य कथितम्?
(vii) शकुंतलायाः मातुः नाम किम्?
(viii) अतिक्षमापनयनाय न तथा क्षमाय किं भवति?

4. अधोलिखितेषु छन्दसां केषाञ्चित् त्रयाणां लक्षणमुदाहरणं लक्षणसङ्गतिं च विवेचनीयम्-

| | | | |
|---|---|---|---|
| (i) | अनुष्टुप् | (ii) | मन्दाक्रान्ता |
| (iii) | मालिनी | (iv) | वंशस्थ |
| (v) | हरिणी | (vi) | इन्द्रवज्रा |

5. वाल्मीकिरामायणमधिकृत्य एकः विस्तृतः लेखः लेखनीयः।

**अथवा**

संस्कृतनाट्यसाहित्यस्य विकासक्रमं विस्तरेण विवेचनीयम्।

6. अधोलिखितेषु कयोः द्वयोः टिप्पणी लिखतु-

| | | | |
|---|---|---|---|
| (i) | दूतकाव्यम् | (ii) | पञ्चतंत्रम् |
| (iii) | दशकुमारचरितम् | (iv) | बुद्धचरितम् |

7. केषाञ्चित् पञ्चप्रश्नानामुत्तराणि संस्कृतमाध्यमेन ददातु-

(i) 'वासवदत्ता' कस्य कृति अस्ति?
(ii) 'किरातार्जुनीयम्' इत्यस्य लेखकः कः?
(iii) कुमारदास रचितस्य काव्यस्य नाम किमस्ति?
(iv) महावीर चरितस्य रचयिता कः अस्ति?
(v) 'शारिपुत्रप्रकरणम्' कस्य रचना अस्ति?
(vi) 'मुद्राराक्षसम्' केन प्रणीतम्?
(vii) 'प्रतिज्ञायौगन्धरायणस्य रचनाकारः कः अस्ति?
(viii) कथासरित्सागरस्य लेखकः कः अस्ति?

http://questionpaperesult.com/
Scanned by CamScanner

8. अधोलिखितेषु पञ्चपदानां प्रकृतिप्रत्ययः लेखनीयः-

| | | | |
|---|---|---|---|
| (i) | प्रपन्नः | (ii) | प्रदानम् |
| (iii) | यातम् | (iv) | उत्थाय |
| (v) | विलोकमतः | (vi) | अनुभवति |
| (vii) | परिभोक्तुम् | (viii) | निन्दन्ती। |

http://questionpaperesult.com/

Scanned by CamScanner